Total No. of Questions - 7] [Total Pages : 4

**(2062)**

# 9832

## M.A. Examination

SANSKRIT

(गद्य, पद्य तथा चम्पू काव्य)

Paper–XIII

(Semester–IV)

Time : Three Hours] [Max. Marks : Regular : 80, Private : 100

परीक्षार्थी अपने उत्तरों को दी गयी उत्तर–पुस्तिका (40 पृष्ठ) तक ही सीमित रखें। कोई अतिरिक्त पृष्ठ जारी नहीं किया जाएगा।

1. सप्रसंगं व्याख्यायताम्–

"ततश्च यस्याश्रमः, तेन मुनिना पुष्पादिक्रमादायागतेन योगदृशा प्रतिपन्नवृत्तान्तेन त्वत्कृते ममायमाश्रमो भग्न इति कुपितेन शिलामयी पुत्रिका भव इति शप्ताऽस्म्यहम्। ततः क्षणेनैवेयं वराकी बहुदुःखमनुभवतीत्यनुग्रहादार्यपुत्रकरुणया च स मुनिर्याच्यमान आर्यपुत्रहस्तस्पर्शावधिकं शापमकरोत्।।"

अथवा

"अथ क्षणेन तरूगुल्मान्तरितं सेनानिवेशं दृष्ट्वा किमयं ममान्वेषणाय तातस्य व्यूहः समायातः। आहोस्विदार्यपुत्रस्येति चिन्तयन्ती मां चारकथितोदन्तो दूरात् किरातसेनापतिर्धावति स्म। ततोऽन्यः किरातसेनापतिस्तादृश एव तथाभूतया सेनयाऽन्वितो मृगयां गतः सोऽपि तच्छ्रुतवा धावति स्म।" 10(12½)

2. "प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्" कथनमिदं सोदाहरणं विमृश्यताम्।

अथवा

वासवदत्तायाः प्रतिपाद्यं विवृणुत। 10(12½)

3. सप्रसंगं व्याख्यायताम्–

"सरवे सैषा सज्जनाचरिता सरणि, यदणीयसि कारणेऽनणीयानादरः संदृश्यते। न चेदिदं नेच्छसि सेयं सन्नतांगयष्टिक्लेशार्हा सत्यनेनाकृत्यकारिणात्यर्थक्लेशिता तन्नयैनां निजलियम्। नान्यदितः किञ्चिदस्ति चित्तराधनं नः।।"

अथवा

"स किल कृतज्ञतां दर्शयन्– असिद्धिरेषा सिद्धिः, यदसन्निधिहिहार्याणाम्। कष्टा चेयं निःसंगता, या निरागसं दासजनं त्याजयति। न च निषेधनीया गरीयसां गिरः इति स्नानाय गृहानयासीत्। अहं च निर्गत्य निर्जने निशीथे सरस्तीररन्ध्रनिलीनः सन्नीषच्छिद्रदत्तकर्णः स्थितः।।"

10(12½)

4. दशकुमारचरितस्य प्रतिपाद्यविषयः **अथवा** महाकवेः दण्डिनः परिचयो लेख्यः। 10(12½)

5. व्याख्यायताम्–

"श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरिः।।"

अथवा

"विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः।
ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः।।"

10(12½)

6. "माघे सन्ति त्रयो गुणाः" इत्युक्तिः समीक्षणीया।

अथवा

शिशुपालवधस्य प्रथमसर्गस्य सारो लेख्यः। 10(12½)

7. यथेच्छं **द्वावेव** व्याख्येयौ–

(क) परिपालयतोऽपि मे महीं परिपूर्तिर्न तनूजदुर्गते।
प्रजया हि मनुष्य इत्यसौ प्रथते हि श्रुतिवर्णपद्धति।।

(ख) जन्मोत्सवो महानेषा जलमत्यच्छमावहन्।
विद्यामनन्यसामान्या व्रीडा कुम्भभुवोऽनयत्।।

(ग) निशाचरै समं बाल्ये नियोद्धुमिव कौतुकी।
उत्तानशयने मुष्टिमुदग्रां मारुतिर्दधौ।

(घ) पञ्चधा प्रवहन्तीनां पवनात्मज एव स।
कौरवक्रोधसिन्धूनां क्रमात् संगमभूरभूत्।। 20(25)

---